# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-3)(New&Old)** | **प्रश्नपत्रम् – 5** | गुणाः –70 |
| विषयः – सर्वदर्शनम् | **कोड –C.E.5.3.3** | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –14/10/2019 | सन्दर्भग्रन्थः – शुद्धद्वैतमार्तण्डः , वेदान्तसंग्रहः च | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ एकस्य श्लोकस्य यथाग्रन्थं व्याख्या विधीयताम्।** ५

१ बोध्यते तेन सर्वं हि ब्रह्मरूपं सनातनम्।
कार्यस्य ब्रह्मरूपस्य ब्रह्मैव स्यात्तु कारणम्।

२ तिरोभावे तु कार्यं हि वर्तते कारणात्मना।
अविर्भावे तु कार्यं हि यथा मृदि घटादयः॥

**प्रश्न २ एकस्य निबन्धनात्मकमुत्तरं लिखत।** १०

१ ब्रह्मणः लक्षणं विलिख्य शुद्धाद्वैतमतानुसारं तस्य स्वरूपं स्पष्टयत।

२ 'तत्त्वमसि' इति महावाक्यार्थवर्णनपुरस्सरं जगदुत्पत्तिप्रकारं निबध्नीत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ एकस्य श्लोकस्य यथाग्रन्थं व्याख्या विधीयताम्।** ५

१ श्रीमत्प्रभुवरैर्विद्वन्मण्डनेऽपि निरूपितम्।
रमणार्ऽथमिदं विश्वमुच्चनीचाऽऽदिभावतः॥

२ प्रक्रान्तत्वात् पिता ब्रह्मा तद्योनिः शक्तिरत्र हि ।
तस्यास्तु जनको विष्णुः सिन्धुशायी निरूपितः॥

**प्रश्न ४ एकस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ ' जन्माद्यस्य यतः' इति सूत्रार्थं यथाग्रन्थं स्पष्टयत।

२ शुद्धाद्वैतमतानुसारं भक्तिस्वरूपं विशदयत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ एकस्य व्याख्यात्मकम् उत्तरं लिखत।** ५

१ दृग्दृश्यनिरूपणम्।

२ इन्द्रियतद्विषयनिरूपणम्।

**प्रश्न ६ एकस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ वेदान्तमतानुसारं मोक्षस्वरूपं वर्णयत।

२ अध्यासस्वरूपं यथाग्रन्थम् उपपादयत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ एकस्य व्याख्यात्मकम् उत्तरं लिखत।** ५

१ वेदान्ताधिकारिनिरूपणम्।

२ समाधिस्वरूपम्।

**प्रश्न ८ एकस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ क्षेत्रक्षेत्रज्ञविभागं यथाग्रन्थं निबध्नीत।

२ अद्वैतवेदान्तमतानुसारं भक्तिस्वरूपं विमृश्य अद्वैतसिद्धिम् उपपादयत।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ शुद्धाद्वैतमार्तण्डस्य रचयिता कः?

२ ज्ञानं कतिविधम्? नामानि लिखत।

३ सनातनं किं रूपम् अस्ति?

४ ब्रह्मसूत्राणां प्रथमं सूत्रं किम्?

५ जीवः कस्य अंगः वर्तते?

६ ब्रह्म किमर्थं जगद्रूपेण अभवत्?

७ मायावादिनः के सन्ति?

८ वेदान्तसंग्रहः केन रचितः?

९ कोषाः कति सन्ति?

१० जीवस्य कियत्यः अवस्थाः भवन्ति?

११ को नाम अध्यासः?

१२ वेदान्तमते प्रमाणं कतिविधम्?

१३ शब्दवृत्तयः कति भवन्ति?

१४ गङ्गायां घोषः इत्यत्र कः समासः?

१५ को नाम शमः?